## गाण्ड्यजगात् सञ्ज्ञायाम् । (११०/१९१७)

गाण्डी अजग इत्येताभ्यां वः प्रत्ययो भवति सञ्ज्ञायां विषये मत्वर्थे । गाण्डीवं धनुः । [1]अजगवं धनुः । ह्रस्वादपि भवति[2] गाण्डिवं धनुः इति । तत्र तुल्या हि संहिता दीर्घह्रस्वयोः । उभयथा च सूत्रं प्रणीतम् ॥

## काण्डाण्डादीरन्नीरचौ । (१११/१९१८)

काण्ड अण्ड [3]इत्येताभ्यां यथासङ्ख्यम् ईरन्नीरचौ[4] प्रत्ययौ भवतो मत्वर्थे । काण्डीरः । [5]अण्डीरः ॥

## रजःकृष्यासुतिपरिषदो वलच् । (११२/१९१९)

रजःप्रभृतिभ्यः प्रातिपदिकेभ्यः वलच् प्रत्ययो भवति [6]मत्वर्थे । रजस्वला[7]स्त्री । कृषीवलः कुटुम्बी । [8]आसुतीवलः शौण्डिकः । परिषद्वलो राजा । 'वले' (६.३.११८/१०४०) इति दीर्घत्वम् । इतिकरणो विषय-नियमार्थः सर्वत्र सम्बध्यते । तेनेह न भवति, रजोऽस्मिन् ग्रामे विद्यते इति ।

[५८४] वलच्प्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम् । (म. भा. २. ३९७)

भ्रातृवलः[9] । पुत्रवलः । [10]उत्साहवलः[11] ॥

## दन्तशिखात् सञ्ज्ञायाम् । (११३/१९२०)

दन्तशिखाशब्दाभ्यां वलच् प्रत्ययो भवति मत्वर्थे सञ्ज्ञायां विषये । दन्तावलः [12]सैन्यः । दन्तावलो गजः । शिखावलं नगरम्[13] । [14]शिखावला स्थूणा ॥

## ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः । (११४/१९२१)

[15]ज्योत्स्नादयः शब्दाः निपात्यन्ते मत्वर्थे सञ्ज्ञायां विषये । ज्योतिष उपधालोपो नश्च प्रत्ययो निपात्यते – ज्योत्स्ना चन्द्रप्रभा । तमस उपधाया [16]इकारो रश्च – तमिस्रा [17]रात्रिः । स्त्रीत्वमतन्त्रम् । अन्यत्रापि दृश्यते – तमिस्रं नभः । शृङ्गाद् इनच् प्रत्ययो निपात्यते – शृङ्गिणः । ऊर्जोऽसुगागमो निपात्यते विनिवलचौ प्रत्ययौ[18] – ऊर्जस्वी, ऊर्जस्वलः । [19]गोर्मिनि प्रत्ययो निपात्यते – गोमी । मलशब्दाद् इनज्मसचौ प्रत्ययौ निपात्येते – मलिनः, मलीमसः ॥

## अत इनिठनौ । (११५/१९२२)

अकारान्तात् प्रातिपदिकात् इनिठनौ प्रत्ययौ भवतः[20] । दण्डी, दण्डिकः । छत्री, छत्रिकः । अन्यत-रस्याम् इत्यधिकारान् मतुब् अपि भवति । दण्डवान् । छत्रवान्[21] । तपरकरणं किम् ? [22]श्रद्धावान्[23] ।

एकाक्षरात् कृतो जातेः सप्तम्यां च न तौ स्मृतौ (म.भा.२. ३९८) ।

[24]एकाक्षरात् तावत् – स्ववान् । खवान् । कृतः – [25]कारकवान् । जातेः – व्याघ्रवान् । सिंहवान् ।

---

1. अजकवं धनुः ह. 2. इति वक्तव्यम् इत्यधिकम् क. 3. इति शब्दाभ्यां ड. फ, शब्दाभ्यां क. 4. इत्येतौ इत्यधिकम् क. 5. आण्डीरः ड, काण्डवान् आण्डवान् इत्यधिकम् ड. 6. मत्वर्थे नास्ति फ. 7. कान्या ड. 8. आसतीवलः क. 9. मातृवलः इत्यधिकम् ग. 10. उत्सङ्गवलः म. भा. व. ड, उत्साहावलः ड. 11. मदावलः इत्यधिकम् क. 12. धौम्यः ड, नास्ति क. 13 शिखावलो मयूरः इत्यधिकम् क. 14. उदाहरणमिदं नास्ति क. 15. मतुब् इति वर्तते इत्यधिकम् ब. फ. ह. 16. इत्वं रश्च प्रत्ययः व. क. फ. 17. रात्रिः नास्ति फ. 18. भवतः इत्यधिकम् फ. 19. गोशब्दात् क. ग. 20. मत्वर्थे इत्यधिकम् ब. क. ड. 21. इति इत्यधिकम् ड. 22. खट्वावान् ब. क. ड. फ. 23. मालावान् इत्यधिकम् ड. फ. 24. एकाक्षरान्तत्वात् क. 25. हारकवान् व. ड. फ.